श्रीगुरुभ्यो नमः






# शंकर भक्त सभा ट्रस्ट्

## वेदभवनम्

५८-५९, रोड् नम्.१, चन्द्रगिरि कालनि, नेरेड्मेट्, सिकंदिराबाद् - ५६.

## सम्मान पत्रम्

श्रीमत्काञ्चीकामकोटिपीठाधीश्वराणां
श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीपादानां आज्ञया प्रतिष्ठापितया
सभयैतया प्रतिहायनं वेदाध्यापनैकनिरता विद्वांसः संमाननीया इति
संकल्पितरीत्या हेमलम्ब नाम वत्सरे चेन्नपुरी वास्तव्याः
वेदाध्यापनतत्पराः विद्वन्मूर्धन्याः वैदिकश्रेष्ठाः
विद्या रत्नम्, वेद विद्या अलङ्कारा, वेद विद्या विशारदा,
वेद शास्त्र प्रवीणा, वैदिक कलानिधि

**ब्रह्मश्री वै.राजगोपाल सलक्षणघनपाठिनः**

तेषां वेदसेवां तत्र च भूयसीं सफलतां समवगत्य
विस्मयभर भरितान्तरङ्गैः हर्षोत्कण्ठित हृदयैरस्माभिः

## ‘आम्नायवाचस्पतिः’

इत्युपाधिना सप्रणति सभाज्यन्ते । आशास्महेचेमे विद्वत्तल्लजाः
लोककल्याणाय भूयसश्छात्रान् एवमेवाध्यापयन्तः सन्तः
श्रीवेदमातुः श्रीपरमाचार्यपादानांच परमानुग्रहमवाप्नुयुरिति ।

११-०५-२०१७
भाग्यनगरम्

इत्थं
संस्थाकार्यनिर्वाहकाः